# ध्वन्यालोकस्थं मङ्गलाचरणम्

मनीषकुमारझाः

ग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलाचरणं क्रियते। तच्च मङ्गलम् आशीर्वादात्मकं, नमस्कारात्मकं, वस्तुनिर्देशात्मकञ्च भवति इति। अत्र ध्वन्यालोके आनन्दवर्धनाचार्येण आशीर्वादात्मकं मङ्गलम् आचरितम् इति। तच्च मङ्गलम्–

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥

**अन्वयः–** स्वेच्छाकेसरिणः त्रायन्तां वो मधुरिपोः स्वच्छ-स्वच्छाया-आयासित-इन्दवः प्रपन्नार्तिच्छिदो नखाः।

अत्र मूलकारिकाग्रन्थस्य रचयिता तथा वृत्तिकारः आनन्दवर्धनमहोदयः (यद्यपि) स्वयं निरन्तरं परमेश्वरनमस्कारसम्पतिचरितार्थोऽपि व्याख्यातृश्रोतॄणाम् अविघ्नेन अभीष्टव्याख्या-श्रवणलक्षणफलसम्पत्तये समुचिताशीःप्रकटनद्वारेण परमेश्वरसांमुख्यं करोति वृत्तिकारः इति।

**अर्थः–** स्वेच्छाकेसरिणः अर्थात् निजेच्छया सिंहस्य रूपधारिणः भगवतः मधुरिपोः स्वच्छस्वच्छाया-यासितेन्दवः प्रपन्नानां शरणागतानां प्रह्लादप्रभृतीनां पीडां छिन्दन्ति विनाशयन्ति ये तथाभूताः नखाः वः इत्युक्ते युष्मान् व्याख्यातृश्रोतॄन् त्रायन्ताम् अर्थात् रक्षन्तु इति।

भगवतः मधुरिपोः नारायणस्य नखाः युष्मान् व्याख्यातॄन् श्रोतॄन् च त्रायन्ताम्। सम्बोध्यस्यैव उपस्थितौ युष्मद् इति प्रयोगयोग्यत्वम्। तत्र कीदृशस्य मधुरिपोः इति जिज्ञासायाम् उच्यते– स्वेच्छया केसरिणः धृतकेसरिरूपस्य न तु कर्मपारतन्त्र्येण न वा अन्यदिच्छया। अपि तु विशिष्ट-दान-वहनौचित्यात् धृतसिंहरूपस्य विष्णोः इति। कीदृशाः नखाः इति चेत् प्रपन्नानाम् आर्तिं ये छिन्दन्ति तादृशाः नखाः। परमेश्वरेच्छया निर्मितौचित्यात् युक्तं हि नखानाम् आर्तिच्छेदकत्वम् इति। अथवा त्रिजगतः कण्टकरूपः हिरण्यकशिपुः क्लेशजनकः एव, आर्तेः मूर्तस्वरूपः इत्यतः तद्विनाशाद् हि नखानाम् आर्तिच्छेदकत्वं परमेश्वरस्य च परमकारुणिकत्वं ध्वन्यते इति। पुनश्च ते नखाः नैर्मल्यस्वच्छतादिगुणेन वक्रहृद्यरूपयाऽकृत्या चन्द्रं खेदितवन्तः। अत्र च अर्थशक्तिमूलध्वनिना चन्द्रस्य बालत्वं ध्वन्यते। ततश्च नखानां च तेषां स्वच्छतां कुटिलमानं च अवलोक्य बालचन्द्रः खेदम् अनुभवति यत् तत्तुल्योऽपि न अहं यतो हि ते नखाः तु प्रपन्नानाम् आर्तत्राणे कुशलाः अहं तु नास्मि इति। अनेन अत्र व्यतिरेकालङ्कारोऽपि ध्वन्यते। किञ्च नाहम् अधुना एकाकी असाधारणवैशद्यहृद्याकारः जनानाम् अभिलाषी अपि तु ते नखाः सन्तापहारिणः वैशद्यहृद्याकाराः एव जनानाम् इष्टाः इति विचिन्त्य चन्द्रः आयासम् अनुभवति इत्यनेन अत्र अपह्नुत्यलङ्कारः अपि ध्वनितः।

एवं वस्तु-अलङ्कार-रसभेदेन त्रिधा ध्वनिः अत्र श्लोके व्याख्यातः इति।